# shrI lakShmI narasinha suprabhAta stotram (yAdagiri)

# શ્રીલક્ષ્મી નરસિંહ સુપ્રભાતસ્તોત્રમ્ (યાદગિરિ)

## Document Information

Text title : lakShmI narasi.nha suprabhAta stotram yAdagiri

File name : laxminrisimhaSup.itx

Category : vishhnu, dashAvatAra, stotra, vishnu

Location : doc_vishhnu

Author : Traditional

Transliterated by : http://www.mypurohith.com

Proofread by : Venkata N Vangeepuram vangeepuram at rediffmail.com Great grandson of the composer

Latest update : February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

shrI lakShmI narasinha suprabhAta stotram (yAdagiri)

# શ્રીલક્ષ્મી નરસિંહ સુપ્રભાતસ્તોત્રમ્ (યાદગિરિ)

। શ્રી યાદગિરિ લક્ષ્મીનૃસિંહ સુપ્રભાતમ્
શ્રી વઙ્ગીપુરમ્ નરસિંહાચાર્યરચિત ।
કૌસલ્યા સુપ્રજા રામ પૂર્વા સંધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠ નરશાર્દૂલ! કર્તવ્યં દૈવમાહ્નિકમ્ ॥ ૧॥

ઉત્તિષ્ઠોત્તિષ્ઠ ગોવિંદ ઉત્તિષ્ઠ ગરુડધ્વજ ।
ઉત્તિષ્ઠ કમલાકાન્ત ત્રૈલોક્યં મઙ્ગળં કુરુ ॥ ૨॥

યાદાદ્રિનાથશુભમન્દિરકલ્પવલ્લિ
પદ્માલયે જનનિ પદ્મભવાદિવન્દ્યે ।
ભક્તાર્તિભઞ્જનિ દયામયદિવ્યરૂપે
લક્ષ્મીનૃસિંહદયિતે તવ સુપ્રભાતમ્ ॥ ૩॥

જ્વાલાનૃસિંહ કરુણામય દિવ્યમૂર્તે
યોગાભિનન્દન નૃસિંહ દયાસમુદ્ર! ।
લક્ષ્મીનૃસિંહ શરણાગતપારિજાત
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૪॥

શ્રીરઙ્ગવેઙ્કટમહીધરહસ્તિશૈલ
શ્રી યાદવાદ્રિમુખસત્ત્વનિકેતનાનિ ।
સ્થાનાનિ તેકિલ વદન્તિ પરાવરજ્ઞાઃ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૫॥

બ્રહ્માદયસ્સુરવર મુનિપુઙ્ગવાશ્ચ
ત્વાં સેવિતું વિવિધમઙ્ગળવસ્તુહસ્તાઃ ।
દ્વારે વસન્તિ નરસિંહ ભવાબ્ધિપોત
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૬॥

પ્રહ્લાદ નારદ પરાશર પુણ્ડરીક

વ્યાસાદિભક્તરસિકા ભવદીયસેવામ્ ।
વાઞ્છન્ત્યનન્યહૃદયા કરુણાસમુદ્ર
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૭॥

ત્વદ્દાસ્યભોગરસિકાશ્શઠજિન્મુખાર્યાઃ
રામાનુજાદિમહનીયગુરુપ્રધાનાઃ ।
સેવાર્થ મત્ર ભવદીયગૃહાઙ્ગણસ્થાઃ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૮॥

ભક્તા સ્ત્વદીયપદપઙ્કજસક્તચિત્તાઃ
કાલ્યં વિધાય તવકન્દર મન્દિરાગ્રે ।
ત્વદ્દર્શનોત્સુકતયા નિબિડં શ્રયન્તે
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૯॥

દિવ્યાવતારદશકે નરસિંહ તે તુ
દિવ્યાવતારમહિમા નહિ દેવગમ્યઃ ।
પ્રહ્લાદદાનવશિશોઃકિલ ભક્તિગમ્યઃ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૦॥

શ્રીયાદવાદ્રિશિખરે ત્વમહોબિલેઽપિ
સિંહાચલે ચ શુભમઙ્ગળશૈલરાજે ।
વેદાચલાદિ ગિરિ મૂર્ધસુ સુસ્થિતોસિ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૧॥

કામ્યાર્થિનો વરદકલ્પક કલ્પકં ત્વાં
સેવાર્થિનઃ સ્સુજનસેવ્યપદદ્વયં ત્વામ્ ।
ભક્ત્યા વિનમ્ર શિરસા પ્રણમન્તિ સર્વે
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૨॥

ત્વન્નામમન્ત્રપઠનેન લુઠન્તિ પાપાઃ
ત્વન્નામમન્ત્રપઠનેન લુઠન્તિ દૈત્યાઃ ।
ત્વન્નામમન્ત્રપઠનેન લુઠન્તિરોગાઃ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૩॥

લક્ષ્મીનૃસિંહ! જગદીશ! સુરેશ! વિષ્ણો
જિષ્ણો! જનાર્દન! પરાત્પર વિશ્વરૂપ ।
વિશ્વપ્રભાતકરણાય કૃતાવતાર

યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૪॥

ત્વન્નામમન્ત્ર પઠનંકિલસુપ્રભાતં
અસ્માકમસ્તુ તવચાસ્તુ ચ સુપ્રભાતમ્ ।
અસ્મત્સમુદ્ધરણમેવ વિચિત્રગાધ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૫॥

ત્વત્ પૂજકા પરિવૃઢા પરિચારકાશ્ચ
નિત્યાર્ચનાય વિધિવદ્વિહિત સ્વકૃત્યાઃ ।
યત્તસ્ત્વદીય શુભગહ્વર મન્દિરાગ્રે
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૬॥

પ્રાભાતકીમુપચિતિમ્ પરિકલ્પયન્તઃ
કુણ્ડાશ્ચ પૂર્ણજલકુમ્ભમુપાહરન્તઃ ।
શ્રીવૈષ્ણવાઃ સમુપયાન્તિહરે! નૃસિંહ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૭॥

સૂર્યોઽભ્યુદેતિ વિકસન્તિ સરોરુહાણિ
નીલોત્પલાનિ હિ ભવન્તિ નિમીલિતાનિ ।
પ્રાગ્દિઙ્મુખેરુણગભસ્તિગણોઽભ્યુદેતિ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૮॥

મન્દાનિલસ્સુર નદીકમલોદરેશુ
મન્દંવિગાહ્ય શુભસૌરભ માદધાનઃ ।
હર્ષપ્રકર્ષમુપયાતિ ચ સેવિતું ત્વાં
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૧૯॥

તારાગણોવિયતિ મજ્જતિ સુપ્રભાતે
સૂર્યેણસાકમવલોકયિતું ત્વદીયમ્ ।
શ્રીસુપ્રભાતમવભાસિત સર્વલોકં
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૦॥

પક્ષિસ્વનાશ્ચપરિતઃપરિસમ્પતન્તિ
કૂજન્તિકોકિલગણાઃકલકંઠરાવૈઃ ।
વાચા વિશુદ્ધકલયાનુવદન્તિકીરાઃ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૧॥

પલ્લીષુ વલ્લવજનાઃસ્વગૃહાઙ્ગણેષુ
ધેનૂર્દુહન્તિ વિનિભાન્તિ વિશેષદૃષ્ટ્યા ।
ગોપાલબાલ ઇવ ભક્તહૃદમ્બુજેષુ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૨॥

ગાઢાંધકારપટલમ્ ગગનંજહાતિ
મોહાન્ધકાર ઇવ સન્મનુજમ્ સમસ્તમ્ ।
રાગોવિરાગ ઇવ સંવિશતિ પ્રકામં
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૩॥

નિદ્રાજહાતિ હિ જનાન્ સુમુનિં યધાવત્
પ્રજ્ઞાપ્યુદેતિ હિ જનેષુ મુનૌયધાવત્ ।
સક્તિર્જનેષુ હિ યથા ચ મુનૌવિરક્તિઃ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૪॥

ફુલ્લાનિપઙ્કજવનાનિ વિશુધ્દસત્ત્વ
ફુલ્લાનિ સજ્જનમનઃકમલાનિ યદ્વત્ ।
ભાશ્શુધ્દસત્વમિવ ભાતિ વિદિક્ષુ દિક્ષુ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૫॥

બ્રહ્માસ્વયંસુરગણૈસ્સહલોકપાલૈઃ
ધામપ્રવિશ્ય તવ મણ્ડપગોપુરાઢ્યમ્ ।
પઞ્ચાઙ્ગશુદ્ધિમભિવર્ણયતિ ત્વદીયાં
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૬॥

વિખ્યાતવૈદ્યજન વઞ્ચકરોગજાલ
વિખ્યાતવૈદ્ય ઇતિ રોગનિપીડિતાસ્ત્વામ્ ।
નિશ્ચિત્યધામ તવ દૂરત આપતન્તિ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૭॥

ભૂતગ્રહાદિ બલવત્તર તાપયુક્તાઃ
બાણાવતીમુખ મહોગ્રપિશાચ વિધ્દાઃ ।
સ્નાતાઃપ્રદક્ષિણવિધા વુપયાન્તિનાથ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૮॥

સન્તાનહીન વનિતાસ્સરસિ ત્વદીયે
સ્નાત્વાજલાર્દ્રવસનાસ્તવ દર્શનાય ।

આયાન્તિસન્તતિવરપ્રદ દેવદેવ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૨૯॥

યદ્દુષ્ટ સંહરણમુત્તમલોકરક્ષા
દીક્ષાં વ્યનક્તિ તવરૂપ મહોનૃસિંહ ।
તચ્ચાત્ર યાદગિરિમૂર્થનિસંવિભાતિ
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૩૦॥

પ્રહ્લાદ પુણ્યજનિ પુણ્યબલાત્પ્રતીતં
રૂપં જનસ્તવહરે નિગમાન્તવેદ્યમ્ ।
પ્રાતઃસ્મરંસ્તરતિ સંસ્મારણામ્બુરાશિં
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૩૧॥

શ્રીસુપ્રભાતમિદમચ્યુતકૈતવોક્ત
મપ્યચ્યુતં ભવતુભક્તજનૈકવેદ્યમ્ ।
લક્ષ્મીનૃસિંહ તવ નામશુભપ્રભાવાત્
યાદાદ્રિનાથ નૃહરે! તવ સુપ્રભાતમ્ ॥ ૩૨॥

ઇત્થં યાદાદ્રિનાથસ્ય સુપ્રભાત મતન્દ્રિતાઃ ।
યે પઠન્તિ સદા ભક્ત્યા તે નરાસ્સુખભાગિનઃ ॥ ૩૩॥

ઇતિ શ્રી લક્ષ્મી નરસિંહ સુપ્રભાતમ્ ।

Proofread and corrected by
Venkata N Vangeepuram vangeepuram@rediffmail.com

---

*shrI lakShmI narasinha suprabhAta stotram (yAdagiri)*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*